**बृषी** स्त्री बृषन्तोऽस्यां सीदन्ति पृषो० बृषी बृ सद–ड गौरा० ङीषन्तत्र । व्रतीनामासने अमरः ।

**बृ(वृ)ह** वृद्धौ भ्वादि० पर० अक० सेट् व(ब)र्हति अव(ब)र्हीत् । इरित् इत्त्वेके तेन अबृ(वृ)हदित्यपि । कवि० कल्पद्रुमे बृहधातुमात्रस्य अन्त्यस्यादित्वमुक्तम् मेदि० "प्रोच्चितं निहते चित्तं बृहती वसनान्तरे । छन्दोभिद्–क्षुद्रवार्त्ताकीवारिधानीषु वाचि च । कण्टकारीमहत्योश्च" "ब्रह्मतत्त्वतपोवेदे न द्वयोः पुंसि वेधसि" । ऋत्विग्योगभिदोर्विप्रे बन्धनं बधबन्धयोः" । इहप्रकृतिः बृहती ब्रह्मशब्दयोः ओष्ठ्यादितयोक्तत्वादस्य उभयादित्वम् ।

**बृ(वृ)हक** पु० बृ(वृ)ह–कुन् । देवगन्धर्वभेदे भा०आ०१२३अ० ।

**बृ(वृ)हच्चञ्चु** पु० ६त०। महाचञ्चुशाके राजनि० ।

**बृ(वृ)हच्चित्त** पु० ७त० । फलपूरे बीजपूरे शब्दच० ।

**बृ(वृ)हच्छल्क** पु० ६त० । चिङ्कटमत्स्ये जटा० ।

**बृ(वृ)हच्छ्रवस्** त्रि० ६ब० । महायशस्के भाग० १।४।१ ।

**बृ(वृ)हज्जातक** न०कर्म०। वराहमिहिरकृते जातकग्रन्थभेदे ।

**बृ(वृ)हज्जाबाल** पु० कर्म०। उपनिषद्भेदे उपनिषच्छब्दे दृश्यम् ।

**बृ(वृ)हज्जीवन्ती** स्त्री कर्म० । महाजीवन्त्याम् राजनि० ।

**बृ(वृ)हड्ढक्का** स्त्री कर्म० । १भेरीवाद्ये जटा० ।

**बृ(वृ)हत्** त्रि० बृह–अति शतृवत् कार्य्यम् । १महति स्त्रियां ङीप् । सा च २उत्तरीयभेदे नवाक्षरपादके ३छन्दोभेदे ४क्षुद्रवार्त्ताक्यां ५वारिधान्यां ६वाचि ७कण्टकार्य्याञ्च स्त्री मेदि० । दक्षिणौ पु० । "अणुर्बृ(वृ)हन् कृशः स्थूलः" विष्णुस० । आच्छादनपरत्वे कन् । बृहतिका उत्तरीयवस्त्रे अमरः । स्वार्थे क । बृहतीशब्दे च स्त्री ।

**बृ(वृ)हतीपति** पु० बृ(वृ)हत्या वाचः पतिः । पारस्करा० "तद्बृहतोः करपत्योश्चौरदेवयोः" वार्त्ति० देवतायामेव सुट् तलोपश्च नान्यत्र वाक्पतौ हेमच० ।

**बृ(वृ)हत्क** त्रि० बृहत्प्रकारः कन् । बृहत्प्रकारे

**बृ(वृ)हत्कथा** स्त्री वररुचिप्रणीते कथाभेदे ।

**बृ(वृ)हत्कन्द** पु० ६ब०। १गृञ्जने रत्नमाला । २विष्णुकन्दे राजनि० । [पु० हरिवं० ३१अ०

**बृ(वृ)हत्कर्म्मन्** त्रि० ६त० । १महाकर्मयुते २बृहद्रथपुत्रभेदे

**बृ(वृ)हत्काय** पु० आजमीढवंश्ये नृपभेदे भाग० २१।१७ । ६ब० । २महादेहे त्रि० । [शाकभेदे त्रिका० ।

**बृ(वृ)हत्कालशाक** पु०नित्यक०। महति (कालकासुन्दिया)

**बृ(वृ)हत्कास** पु० नित्यक०। खड्गटे तृणभेदे हारा० ।

**बृ(वृ)हत्कीर्त्ति** त्रि०६ब०। १महाकीर्त्तियुक्ते २आङ्गिरसाग्निपुत्रभेदे पु०भा०व०२१७अ०।३असुरभेदे पु०हरिवं०४२अ०

**बृ(वृ)हत्कुक्षि** त्रि० ६ब० । तुन्दिले अमरः । [आ०६अ०।

**बृ(वृ)हत्केतु** त्रि०६ब०।१महाध्वजयुते ।२राजभेदे पु० भा०

**बृ(वृ)हत्क्षत्र** पु० आजमीढवंश्ये नृपभेदे भाग० ६।२६ ।

**बृ(वृ)हत्ताल** पु० नित्यक० । हिन्तालवृक्षे राजनि० ।

**बृ(वृ)हत्तिक्ता** स्त्री बृहन् तिक्तो रसोऽस्याः । पाठायाम् राजनि० ।

**बृ(वृ)हत्तृण** पु० ६ब० । वंशे शब्दच० ।

**बृ(वृ)हत्त्वच्** पु० ६ब० । (छातिम) वृक्षभेदे रत्नमा० ।

**बृ(वृ)हत्पत्र** त्रि०६ब० । १महापत्रयुक्ते वृक्षे २हस्तिकन्दे राजनि० । ३त्रिपर्णिकायां स्त्री राजनि० ।

**बृ(वृ)हत्पाटलि** पु० नित्यक० । धुस्तूरे त्रिका०। [शब्दच०

**बृ(वृ)हत्पाद** त्रि० ६ब०।१महाचरणयुक्ते वृक्षे २वटवृक्षे पु०

**बृ(वृ)हत्पारेवत** न० कर्म० । महापारेवते राजनि० ।

**बृ(वृ)हत्पालिन्** पु० बृ(वृ)हन्तं पालयति पालि–णिनि । वनजीरके राजनि० ।

**बृ(वृ)हत्पीलु** पु० नित्यकर्म० । महापीलौ राजनि० ।

**बृ(वृ)हत्पुष्पी** स्त्री ६ब० ङीप् । १घण्टारववृक्षे जटा० । २महापुष्पयुतवृक्षमात्रे त्रि० स्त्रियां टाप् ।

**बृ(वृ)हत्फल** त्रि० ६ब० । १महाफलयुते । २कटुतुम्ब्यां ३माहेन्द्रवारुण्यां ४कुष्माण्ड्यां ५महाजम्बूवृक्षे च स्त्री टाप् राजनि० । [भेदे ।

**बृ(वृ)हत्संहिता** स्त्री वराहमिहिरप्रणीते ज्योतिषग्रन्थ-

**बृ(वृ)हत्सामन्** न० नित्यक० । सामभेदे तच्च साम "त्वामिद्धि हवामहे" इत्यस्यामृचि गेयं तच्च तुलादानादिपद्धतावस्माभिः १८१।८२ पृ० दर्शितम् । "वामदेव्यं बृ(वृ)हत्साम ज्येष्ठसाम रथन्तरम्" सामगद्वारपाल-पाठ्यतया विधानपारि० उक्तम् । "बृ(वृ)हत्साम तथा साम्नाम्" गीता० । तच्च साम ब्रह्मप्रतिपादकमिति तद्भाष्यकारेणोक्तं समर्थितञ्चानन्दगिरिणा "इन्द्रः सर्वेश्वरत्वेनानेन स्तूयते इति तस्य श्रैष्ठ्यमिति" ।

**बृ(वृ)हत्सेन** त्रि० ६ब० । १महासेनायुक्ते । २बार्हद्रथवंश्ये भाविनि नृपभेदे पु० भाग० ९।२२।९। ३मागधदेशीये नृपभेदे भा० आ० ६७अ० । कर्म० । ४महत्यां सेनायां स्त्री ।

**बृ(वृ)हदग्नि** पु० ६ब० । १नानाविधाग्नियुते ततः शौना-